श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोपालस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोपालस्तोत्रम् ॥

वक्षस्स्थले मणिमयाभरणाभिरामे
कल्याणकल्पलतिकां कमलां वहन्तम्।
वक्त्रे दधानमतिसुन्दरमन्दहासं
सञ्चिन्तयामि नृपगोपकुमारवेषम् ॥ 1 ॥

वेदान्तमस्तकगिरां प्रथमाभिधेयं
गोपालबालवनिताभवने निधेयम्।
नन्दाङ्गनानयनपङ्कजभागधेयं
सञ्चिन्तयामि नृपगोपकुमारवेषम् ॥ 2 ॥

काञ्चीकलापकमनीयकटिप्रदेशं
कान्तासहस्रकुचमण्डलमण्डनीयम्।
कामं विशालनयनं करुणैकसिन्धुं
सञ्चिन्तयामि नृपगोपकुमारवेषम् ॥ 3 ॥

आजानुदीर्घभुजमञ्चितकञ्जनाभं
आलोलनेत्रमसितोत्पलकर्णपूरम्।
आरूढपक्षिपतिमाश्रितकालमेघं
सञ्चिन्तयामि नृपगोपकुमारवेषम् ॥ 4 ॥

फुल्लातसीकुसुमकान्तिमुषं कुमारं
सौन्दर्यशेवधिमुदारगुणाभिरामम्।
लक्ष्म्यालयं कलितकौस्तुभमम्बुजाक्षं
सञ्चिन्तयामि नृपगोपकुमारवेषम् ॥ 5 ॥

हस्तारविन्दयुगलीधृतशङ्खचक्रं
पीताम्बरं मकरकुण्डलदीप्तगण्डम्।
हाराभिराममभिरामकराङ्गुलीयं
सञ्चिन्तयामि नृपगोपकुमारवेषम्॥ 6॥

कन्दर्पकान्तिमरुणाधरमायताक्षं
कस्तूरिकातिलकशोभितफालभागम्।
पूर्णेन्दुबिम्बवदनं मधुरावलोकं
सञ्चिन्तयामि नृपगोपकुमारवेषम्॥ 7॥

बालं बालं बालमेव स्मरामः
नीलं नीलं नीलमालोकयामः।
गोपं गोपं गोपमेवाश्रयामः
बालं नीलं गोपवेषं भजामः॥ 8॥

नीला लकावृतमुखं तव कुण्डलश्री -
गण्डस्थलाधरसुधां सदयावलोकम्।
दत्ताभयं च भुजदण्डयुगं विलोक्य
वक्षः श्रियो विहरणं च भवाम दासाः॥ 9॥

॥ इति श्रीगोपालस्तोत्रं समाप्तम्॥